International Journal of Applied Research 2021; 7(1): 470-472



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 8.4
IJAR 2021; 7(1): 470-472
www.allresearchjournal.com
Received: 15-11-2020
Accepted: 28-12-2020

**डॉ. संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं.– 3, निकट– पी.टी.सी., लालबाग, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ. संतोष कुमार पाठक**
बेलाशंकर, वार्ड नं.– 3, निकट– पी.टी.सी., लालबाग, दरभंगा, बिहार, भारत

# व्ययभावस्थ ग्रहाणां लोके शुभाशुभफलविमर्शः

**डॉ. संतोष कुमार पाठक**

**सारांश**
जातकस्कन्धे ज्योतिषशास्त्रस्य फलविवेचन प्रसंगवशात् विविधवैशिष्ट्यं परिलक्षितं भवति। तत्रापि भावफलाध्यायः जातकस्य शुभाशुभफलनिरूपणे नितान्तं गरीयसी विद्यते। होराशास्त्रज्ञैः दैवज्ञैः विविध शुभाशुभ फलविवेचनम् पठितं स्वकीयेषु ग्रन्थेषु। जातकस्कन्धः प्राचीन महर्षिः पराशरः विद्यते यस्य महानुभावस्य होराशास्त्रं अस्मिन खलु युगे शुभाशुभ फल निरूपण क्रमे प्रथमः समागच्छति, अतोऽत्र सर्वप्रथमं महर्षि पराशरस्य प्रकृत विषयोपरि विचारं प्रस्तूयते।

**मुख्य शब्द :** व्ययभावस्थ ग्रहाणां, शुभाशुभफलविमर्शः, ज्योतिषशास्त्रस्य

**प्रस्तावनाः**
व्ययभावस्थ ग्रहाणां शुभाशुभफलं निरूपणं निगदति पराशरः। यथा –

चन्द्रोव्ययाधिपो धर्मलाभमन्त्रेषु संस्थितः।
स्वोच्चेस्वर्क्षेनिजांशे वा लाभधर्मात्माजांशके।
दिव्यांगारादिपर्यङ्को दिव्यगन्धैक भोगवान्।।
परार्ध्यरमणो दिव्यवस्त्रमाल्यादि भूषणः।
परार्ध्य संयुतो विज्ञो दिनानि नयति प्रभुः।।[1]

चन्द्रः व्ययेशः सन् यदि 9, 11, 15 भावे स्थितः भवेत् वा स्वकीयोच्च राशि बृषे, स्वकीय राशि कर्के, धनभावनवांशे वा लाभ नवम पञ्चम भावानामन्यतमे स्थितः भवेत्तदा दिव्यं भवनं क्षरयी गन्धादि अपरस्य च धनभोग कर्त्ता भवति। एवं स्थिते चन्द्रे शुभदायकं वित्तंदायकञ्च भवति।

एवं स्वशत्रुनीचांशेअष्टमांशे वाऽष्टमेरिपौ।
संस्थितः कुरूते जातं कान्ता सुखविवर्जितम्।।[2]

एवं स्वकीयशत्रुनवांशे, नीचराशि नवमांशे, अष्टमभावस्य नवमांशे, अष्टमे षष्ठे भावे वा यदि चन्द्रः भवेत्तदा जातकस्य स्त्रीसुखं न भवति। अत्रचन्द्र मसः शत्रुनीचाष्टमानां नवमांशानां फलविवेचनं निरूपितमिति।।

व्ययाधिक्यपरिक्लान्तं दिव्य भोगनिराकृतम्।
स हि केन्द्रत्रिकोणस्थः स्वस्त्रियालंकृतः स्वयम्।।[3]

एवमाधिक्यं व्ययवशात् खिन्नः सन् दिव्ययोगादिरहितः भवति। भोग्यादिसुख वंचितः भवति जातकः। यदि चन्दःकेन्द्र त्रिकोणे स्थितः भवेत्तदा स्त्री सुखयुतः भवति।

लग्नस्य पूर्वार्द्धगतान भोगाः
फलं प्रदद्युस्तु प्रत्यक्षकंते।
परार्द्ध–षट्को–गताः परोक्षं
फलं वदन्तीतिवुधाः पुराणाः।।[4]

लग्नस्य पूर्वार्द्धे दशम भावतः तृतीय भाव पर्यन्तं मतान्तरेण, 7,8,9,10,11,12 भावेषु– अन्यतमे यदि चन्द्रः स्थितः भवेत्तदा प्रत्यक्षफलं ददाति। परार्द्धे 4,5,6,7,8,9 भावेषु भतान्तरेण 1,2,3,4,5 भावेषु अन्यतमे

स्थितः ग्रहः फलप्रदायकः भवति किन्तु परोक्षरूपेण फलं प्रदायकः भवति।

व्ययस्थानगतो राहुःभौभार्करविसंयुतः।
तदीशेऽप्यर्क–संयुक्तैनरके पतनं भवेत।।

द्वादशमे भावे राहुभौमसूर्यैः सहैव व्ययेशेऽपि सूर्येण यदि युतः भवेत्तदा जातकः नरकं प्रयाति

व्ययस्थानगते सौम्ये तदीशे स्वोच्चराशिगे।
शुभयुक्ते शुभैर्दृष्टे मोक्षः स्यान्नात्र संशयः।।[5]

द्वादशे भावे वुधे, व्ययेशे उच्चराशौ चेत् शुभग्रहेण युतदृष्टश्च भवेत्तदामोक्षः भवति।

ब्ययेशे पापसंयुक्ते व्यये पापसमन्विते।
पापग्रहेण संदृष्टे देशात् देशान्तरं गतः।।[6]

व्ययेशः पापग्रह युते, व्ययस्थे पापग्रहे च सति पापग्रहेण यदि दृष्टः भवेत्तदा देशे –विदेशे दूरान्तर गमनं भवति।।

व्ययेशे शुभ राशिस्थे व्ययर्क्षे शुभसंयुते।
शुभग्रहेण सन्दृष्टे स्वदेशात्संचरो भवेत्।।
व्यये मन्दादि संयुक्ते भूमिजेन समन्विते।
शुभदृष्टैर्न संप्राप्तिः पापमूलाद्धनार्जनम।।
लग्नेशे व्ययराशिस्थे व्ययेशेलग्न संयुते
भृगुपुत्रेण संयुक्ते धर्ममूलाद्धनव्ययः।।[7]

यदि व्ययेशः शुभराशिस्थित भवेत, व्यय भावे शुभग्रहो भवेत, शुभग्रहेणदृष्च भवेन्तदा स्वकीयदेशादन्य देशरागमनोत्सुकः भवति। व्ययभावः शनिभौमाभ्यां युतौः भवेतां, शुभग्रहेणादृष्टश्चेद् पापकर्मवशात् धनहानिर्भवति।
लग्नेशः द्वादशे भावे स्थितः भवेत्, व्ययेशश्च लग्नस्थः शुक्रेण युतः यदि भवेत्तदा धर्म कर्मे धन–व्ययः भवति।

दैवज्ञ जीवनाथ महाभागस्य भावविचारः एतादृशः–
अष्टारिव्ययगो यस्य लग्नस्वामी खलैर्युतः
सुखं निहन्ति तस्याशु सर्वभावेष्वयं विधः।।[8]

द्वयेन त्रयेण वा पापग्रहयुतः लग्नेशः यदि षष्ठे, अष्टमेवाद्वादशमे भावेस्थितः भवेत्तदा जातकसुखनाशकारकः भवति। विधिरियमन्य भावेष्वपि संगता भवति।

शुभग्रहाः प्रयच्छन्ति व्ययस्था विपुलं धनम्।
विपरीतं खला जन्तोर्जन्मकाले विशेषतः।।[9]

यदि जन्मकाले शुभग्रहाः व्ययस्थः भवेयुस्तदा जन्तो विपुलं धनं प्रयच्छन्ति। यदा जन्मकाले खलाः पापग्रहाः व्ययस्थाः भवन्ति तदा विशेषरूपेण विपरीतं नेष्टंफलं प्रयच्छन्ति।

क्षीणेन्दुरन्त्यझो यस्य रविणा सहितो यदि।
तस्य वित्तं हरेद्राजा कुजेनापि युतेक्षितः।।

यस्य जातकस्य रविणा सहित यदि क्षीणचन्द्रः व्ययस्थः भवति भौमेनेक्षितः यदि चन्द्रः भवेत्तदा तस्य वित्तं राजा हरेत्।

अन्नृपतिना जातकस्य धनहरणं नेष्टफलद्योतकम्

दैवज्ञ वैद्यनाथेन् होराशास्त्रस्यामूलं ग्रन्थं विरच्य ज्योतिष जगति प्रशंसनीयं कार्यं कृतमिति तस्य भावफलाध्यायस्य सामान्यफलं निगदितं यथा –

होरालंकारमुख्य प्रभवशुभ फलादीनि सर्वाणि पुंसां
नत्तद्भावोद्भवानि द्यूचरबलवशादयानि तानि प्रवच्मि।
ये ये भावोः सितज्ञोमरगुरूपतिभिः संयुता वीक्षिता वा
नान्यैर्दृष्टा न युक्ता यदि शुभफलदा मूर्तिभावादिकेषु।।[10]

अत्र ग्रहवशात् लग्नादि द्वादशभावैरूत्पन्नः शुभाशुभफलं कथ्यति वैद्यनाथः।
ये ये भावाः शुक्रबुधवृहस्पत्यैर्युतः दृष्टः वा भवन्ति, अन्यग्रहैरयुतरेदृष्टश्च यदि भवेयुस्तदा तस्य भावस्य शुभफलं भवति।
उत्तरपाराशरे यथा – यो यो भावःस्वामिदृष्टो युतोवीसौम्यैर्वास्यात्तस्य तस्याभिवृद्धि पापैरेवं तस्य भावस्य हानिर्निर्दिष्टव्या जन्मतः प्रश्नतोवा।।[11]
अपि च कथयति दैवज्ञ वैद्यनाथः महाभागः। यथा –

यद्भावपे केन्द्रगते विलग्नात्।
त्रिकोणगेवा यदि सौम्यदृष्टे।।
तुंगादिवर्गोपगते बलाढ्ये।
तद्भावपुष्टिं फलमाहुरार्याः।।[12]

यो भावेशः लग्नात् केन्द्रे वा त्रिकोण (1,4,7,10 एवं 5, 9) स्थितः भवेत, शुभग्रहैर्दृष्टः–
भवेत्, उच्चादि (उच्चादि, मूलत्रिकोण राशिर्वा मित्रराशि) वर्गे स्थितः सन् बलवान भवेत, तस्य भावस्य फल बृद्धिर्भवति।।

तत्तदभावत्रिकोणे सुखमदन गृहे वाऽऽस्पदे सौम्ययुक्ते
पापानां दृष्टिहीने भवनात सहिते पापखेटैरयुक्ते।
भावानां पुष्टिमाहुः सकलशुभकरं चान्यथा चेत्प्रणाशं
मिश्रं मिश्र ग्रहेन्द्रैरखिलमपि तथा मूर्तिभावादिकानाम्।।[13]

विचारणीय भावात् त्रिकोण (5, 9) भावयोः चतुर्थसप्तमदशम भावेषु पापग्रहैहानि दृष्टियुतिशुभग्रह स्थितः भवेत्। यदि भावः स्वस्वामिना युतः भवेत्तदातस्य भावस्य वृद्धिर्भवति। अस्यां विपरीत परिस्थितौ अर्थात् विचारणीये भावे केन्द्रत्रिकोणे पापग्रहः स्थितः भवेत्, तस्योपरि पापग्रहस्य दृष्टिर्भवेत् भावेश भावेनसह संयुतः न भवेत्तदा तस्य भावस्य फलनाशः भवति। निर्दिष्ट स्थानेषु यदि पाप+शुभ ग्रहद्वयोभिश्रितं भवेत्तदा तस्यभावस्यं सामान्य फलमेव प्राप्तं भवति।।

नाशस्थानगतो दिवाकरकश्च्छन्नस्तु यद्राशिपो
नीचाराति गतोऽथवा यदि शुभैः रवेटैरयुक्तेक्षितः।
तद्भावस्य विनाशनं मुनिगणाः संशंन्ति रवेटैर्युतो
यद्यत्रापि फलप्रदो नहितथा मूर्त्यादिभानां क्रमात्।।[14]

यस्य भावस्य भावेशः नाशस्थाने (अष्टमस्थाने) स्थितः भवेत्, सूर्यरश्मि–नाऽस्तं भवेत्, नीचशत्रुराशैर्वा स्थितः भवेत, शुभग्रहेणादृष्टायुतश्च यदि भवेतदा तस्य भावस्य फलं नष्टं भवति। पूर्वाचार्याणां सम्मतिः यदि उक्त भावेशः क्रूरग्रहैः युक्तभवेत्तदापि न कोऽपि फलं प्राप्तं भवति।

## संदर्भ


1. वृ.पा.हो.शा.अ.16,श्लो.239–40
2. वृ.पा.हो.शा.अ.16,श्लो.241

3. वृ.पा.हो.शा.अ.16,श्लो.242
4. वृ.पा.हो.शा.अ.16,श्लो.243
5. वृ.पा.हो.शा.अ.16,श्लो.239 244
6. बृ.पा.हो.शा.अ.16,श्लो 145–46
7. बृ.पा.हो.शा.अ.16,श्लो 247–49
8. भावकुतूहलम् अ. 15 श्लो।
9. भावकुतूहलम् अ. 53 श्लो।
10. जातक. पा. अ.11 श्लो.1
11. उत्तरपराशरः संकलितमेव।
12. जातक. पा. अ. 11 श्लो. 5
13. जातक. पा. अ. श्लो. 6
14. जातक. पा. अ. श्लो. 7